International Journal of Sanskrit Research 2024; 10(2): 235-237

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(2): 235-237
© 2024 IJSR
www.anantaajournal.com
Received: 17-03-2024
Accepted: 22-04-2024

डॉ राधेश्याम बहुखण्डी
सहायक अध्यापक, संस्कृत
नेशनल इण्टर कॉलेज धनौरी हरिद्वारम,
देहरादून, भारत्

**Corresponding Author:**
डॉ राधेश्याम बहुखण्डी
सहायक अध्यापक, संस्कृत
नेशनल इण्टर कॉलेज धनौरी हरिद्वारम,
देहरादून, भारत

# ज्योतिषदर्शनशास्त्रयोः सम्बन्धः

डॉ राधेश्याम बहुखण्डी

प्रस्तावना

कालात्प्रसूतमिदं विश्वमिदं कालक्रमेणेव परिवर्द्धितं परिचालितं च। भास्कराचार्येण व्याख्यानावसरे ज्योतिषशास्त्रं कालतन्त्रं जगुः इत्थं परिभाषितम्। ज्योतिषशास्त्रं कालविधानशास्त्रम्। दर्शनशब्दोऽयं प्रेक्षणार्थकाद् दृश् धातोः ल्युट् प्रत्यये अनादेशे दर्शनमिति। उपनिषत्सु ज्ञानचक्षुषा येन ज्ञायन्ते तद् दर्शनशास्त्रम्। वस्तुतः आध्यात्मिक, आधिभौतिक, ब्रह्म, जीवात्म, परमात्म, प्रकृत्यादि निरीक्षणम्, परिक्षणम्, समीक्षणम्, विवेचनं दर्शनस्यांगीभूतः।

दर्शनमित्यस्यांग्लपदं PHILOSOHY इति। PHILOSOHY इति पदं यूनानीभाषायां in};su निष्पन्नः। GREEK भाषायां PHILOS+SOPHY = PHILOSOHY यस्यार्थः PHILOS = LOVE, SOPHIA = WISDOME साररुपेण LOVE OF WISDOM विद्यानुरागः।

अन्यकेचन्मते PHILOSOHY इति लैटिन LATIN शब्दः मन्यन्ते। PHILOSOHY अस्यपादद्वयं PHIL+SOPHY यस्यार्थः PHIL = PRINCIPAL, SHOPHY = SCIENCE इति PHILOSOHY = PRINCIPAL OF SCIENCE अस्यार्थः तत्त्वशास्त्रम्तत्त्वविज्ञानमिति। भारतीयपाश्चात्यदर्शनेषु पर्याप्तमतभिन्नतां दृश्यन्ते। विद्यानुराग तत्त्वशास्त्रप्रभृत्तविषयाः भारतीयदर्शनस्यांगीभूताः। भारतीय दर्शनपरम्परा सुव्यवस्थितसुदृढ •च दृश्यते।
यथा–

कस्त्वं कोऽहं कुतः आयातः
का मे जननी को मे तातः।
इति परिभावय सर्वमसारम्
विश्वं त्यक्त्वा स्वप्न विचारम्।। [1]

आदिगुरु शंकराचार्यः चर्पटप • चारिकायां दर्शनपरक जिज्ञासां प्रकट्यते। मनुष्यः स्वभावेन मननशीलः। तद्दुःखनिवारणाय दर्शनशास्त्रं प्रस्फुटितः। यथार्थस्वरुपस्य तार्किकविवेचनं दर्शनम्।

दर्शनस्यप्रयोजनम्– भारतीयपरम्परायां जातकस्य जीवनलक्ष्यं धर्मार्थकाममोक्षरुपी पुरुषार्थचतुष्टयः। दर्शनशास्त्रस्यप्रयोजनमपि पुरुषार्थचतुष्टयप्राप्तिः।

यथोपनिषद्वाक्यम्–

ईशावास्यमिदं सर्वम् यत्किंच जगत्यां जगत्।
तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद् धनम्।। [2]

ज्ञानस्याभावे जातकः बारं–बारं जीवनमरणस्यचक्रे भ्रमितवन्तः। अस्यैव दुःखनिवृत्त्याः चिन्तनं दर्शनशास्त्रस्याधारः।

यथा शंकराचार्येणोक्तम्–

पुनरपि जननं पुनरपि मरणम्,
पुनरपि जननि जठरे शयनम्।
इह संसारे खलु दुस्तारे,
कृपयाऽपारे पाहि मुरारे।। [3]

तथा च ईश्वरकृष्णम्–

दुःखत्रयाभिघाता तदपघातके हेतौ।
दृष्टे साऽपार्था चैन्नैकान्तात्यन्ततौऽभावात्।। [4]

अन्वयः– दुःखत्रयाभिघातात् तदपघातके हेतौ जिज्ञासा भवति। दृष्टे सा अपदार्था चेत्? न एकान्तात्यन्ततोऽभावात्।

भाष्यार्थः– दुःखत्रयेति। दुःखत्रयाभिघात्जिज्ञासेति। दुःखत्रयाः आधिदैविक आधिभौतिक आध्यात्मिक •च। तत्राध्यात्मिकं द्विधा शारीरिकमानसिकं चेति। शारीरिकं वातपित्तश्लेष्म विपर्ययकृतं ज्वरातीसारादि। मानसं प्रियवियोगाऽप्रियसंयोगादि। आधिभौतिकं चतुर्विधंभूतग्रामनिमित्तं मनुष्यपशुपक्षीसरीसृपादीनां, जरायुजस्वेदजाण्डजोद्भिज्जेभ्यः साकाशादुपजायते। आधिदैविकं दैवानामिदं दैवं दिवः प्रभवतीति। शीतोष्णवात्वर्षाऽशनिपातादिकम्। [5]
ज्योतिषीय विवेचनानुसारं आध्यात्मिकं दुःखस्य कारणं प्रारब्धसंचित्कर्माणां फलप्राप्तिः होराशास्त्रविषयाः। आधिदैविकाधिभौतिकयोः संहिताः।
होराशास्त्रे दुःखोन्मादियोगाः–

संस्पृष्ट पवनेन मन्दगयुगे द्यूने विलग्ने गुरौ,
सोन्मादोऽवनिजे स्थितेऽस्तभवने जीवे विलग्ना श्रिते।
तद्वत्सूर्यसुतोदयेऽवनिसुते धर्मात्मजद्यूनगे,
जातो वा ससहस्ररश्मितनये क्षीणे व्यये शीतगौ।। [6]

जन्मांगे लग्नस्थगुरो सप्तमस्थशनि वातरोगकरः। लग्नस्थगुरो सप्तमस्थभौमोन्मादकरः। लग्नस्थशनि नवपंचमसप्तमस्थभौमेनाप्युन्मादकरः। व्यये शनिचन्द्रयोः उन्मादकरः।

तथा च–

चतुर्थे च मातुः सुखेनो कदाचित्
सुहृदवर्गतः पैतृकं नाशयेति।
शिखी बन्धु वर्गात् सुखं स्वोच्चगेहे
चिरं नो वसेत् स्वग्रहे व्यग्रताचेत्।। [7]

सुखस्थ केतोः मातृसुखहरः, बान्धवसुखहरः, पैतृकसम्पदाहरः, व्यग्रकरश्चेति।
संहिताग्रन्थेष्वाधिभौतिकदैविकोत्पाताः तत्परिहाराश्च वर्ण्यन्ते।
यथोक्त गर्गाचार्येण–

अतिलोभादसत्याद्वा नास्तिक्याद्वाव्यधर्मतः।
नरापचारान्नियतमुपसर्गः प्रवर्तते।। [8]

तथा च दैवज्ञवराहमिहिरेण –

अपचारेण नराणामुपसर्गः पापस •चयाद् भवति।
संसूचयन्ति दिव्यान्तरिक्ष भौमास्त उत्पाताः।। [9]

अथ दुःखत्रयाभिघात्जिज्ञासा ज्ञानप्राप्तिरिच्छया लौकिकोपायः नैवसर्वकालिकः। तत्रोभयोः शास्त्रयोः सुखदुःखादि कारणं संचितप्रारब्धकर्मणयोः फलप्राप्तिरिति।
यथोक्तम्–

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्।।

तत्रापि क्रियमाणकर्मा ना तु ग्रहाधीनाः, ना तु दैवाधीनाः तत् पुरुषार्थाधीनाः। तद्विषयक दृष्टान्तमेकं महाभारते शिवगौरी संवादरुपे वर्णितः।
पार्वत्याः कर्ममीमांसाप्रश्ने महादेवः उत्तरीति–

स्थाने संशयितं देवि श्रृणु तत्वविनिश्चयम्।
नक्षत्राणि ग्रहश्चैव शुभाशुभ निवेदकाः।।
मानवानां महाभागे न तु कर्मकराः स्वयम्।
प्रजानां तु हितार्थाय शुभाशुभविधिं प्रति।।
अनागतमतिक्रान्तं ज्योतिश्चक्रेण बोध्यते।
किंतु तत्र शुभं कर्म सुग्रहैस्तु निवेद्यते।।
दुष्कृतस्याशुभैरेव समवायो भवेदिति।
केवलं ग्रहनक्षत्रं न करोति शुभाशुभम्।।
सर्वमाम्मकृतं कर्म लोकवादो ग्रहा इति।। [10]

अस्याशयः ग्रहनक्षत्राश्चैव मानवानां शुभाशुभ सूचकमात्रः। ते स्वयं न कर्मकराः। ग्रहनक्षत्राः स्वयमेव फलदातुं न समर्थः। ते संचितप्रारब्धानुसार कर्मफलोत्पादकाः।
श्रीमद्भागवत्पुराणे–

खं वायुमग्निं सलिलं महीं च,
ज्योतिंषि सत्वानि दिशो द्रुमादीन्।
सरित्समुद्राश्च हरेः शरीरम्,
यत् कि •च भूतं प्रणमेदनन्यः।। [11]

भर्तृहरि कृत वाक्यपदीयम् ग्रन्थे कालसमुद्देश्यनामकोऽध्याये कालशक्ति वर्ण्यते। सृष्ट्योत्पत्तिसमये कालशक्तिः क्रियात्मकशक्तिरुपेण कार्यं करोतीति। कालशक्तिः ब्रह्मणः स्वातन्त्र्यशक्तिः।
यथा–

कालाख्य हि स्वातन्त्र्यशक्तिर्ब्रह्मणः।। [12]

विभिन्न दर्शनेषु कालतत्वं पृथक्–पृथक् स्वरुपात्मकः। न्यायवैशैषिको कालः अमूर्तः सर्वव्यापकः नित्यस्वरुपात्मकः।

यथा–

अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च [13]

सांख्यदर्शने भूत, भविष्य, वर्तमान त्रिविधकालं सत्वरजस्तमसस्वरुपात्मकः। भूतभविष्यावरकेन तमोरुपाः। सांख्यदर्शनेकालः आकाशस्यगुणस्वरुपात्मकः।
यथा–

दिक्कालावाकाशादिभ्यः।। [14]

भट्टमीमांसकमतेन कालप्रत्यक्षगम्येन्द्रियग्राह्यं च।
यथा–

स च काल बहिरिन्द्रियग्राह्यः।। [15]

पौराणिकग्रन्थोक्त प्रसंगवशात् कालतत्वस्य दार्शनिकविवेचनम्।
यथा–

तदेव सर्वमेतत् व्यक्ताव्यक्तस्वरुपवत्।
तथा पुरुषरुपेण कालरुपेण च स्थितम्।। [16]

तथा च–

अनादि भगवान् कालो नान्तोऽस्य द्विजविद्यते।
अत्युच्छिन्नास्ततस्वेते सृष्टिस्थितित्यन्तसंयमा।। [17]

ज्योतिषशास्त्रं कालविधानशास्त्रम्। कालेव सृष्टि स्थिति लयकारकः। सौरमण्डलस्थ ग्रहाः कालानुचराः। मनोवैज्ञानिकदृष्ट्या मानवव्यक्तित्वं द्विधा बाह्याभ्यन्तरश्चेति। बाह्य भौतिकशरीरात्मकः। गुरु–मंगल–चन्द्रः तस्याधिपतयाः। आभ्यन्तरः क्रियारुपः। तस्याधिपतयाः शुक्र–बुध–सूर्यश्चेति। अन्तःकरणाधिपतिः शनैश्चरः। अन्तःकरणं बाह्याभ्यन्तरव्यक्तित्वयोः सेतुकारकः। [18]
सूर्यादिग्रहाः जन्मजन्मान्तरीय शुभाशुभकर्मणाः द्योतकाः। एवं च कर्ममीमांसामते ते ग्रहाः लग्नादिभाव मेषादिराश्यानुसार विभिन्नफलप्रदायकाः।

तत्र ज्योतिषदर्शनयोः समानलक्ष्यं पुरुषार्थचतुष्टयानां प्राप्तिः। तौ कर्ममीमांसकौ, तौ वैदिकपरम्परायाः संवाहकौ, तौ चिन्तनपरकव्यवहारिकशास्त्रौः, तौ कल्याणकारकौ। दर्शनाभावे ज्योतिर्विज्ञानमपूर्णम्, ज्योतिषाभावे दर्शनतत्वं नैव प्राप्यन्ते।

सांदर्भ सूची


1. चर्पटप •चारिका 24
2. ईशावास्योपनिषद् 1
3. चर्पटप •चारिका 21
4. सांख्यकारिका 1
5. सांख्यकारिका 1 भाष्य
6. बृहज्जातकम् 23/13
7. चमत्कार चिन्तामणी केतुफल 4
8. बृहत्संहिता 46/01
9. बृहत्संहिता भटोत्पलीयम्
10. महाभारत अनुशासनपर्व अ0145
11. भागवतपुराण 11/2/41
12. वाक्यपदीयम् 3/9/45
13. तर्कसंग्रहः
14. शर्मा पुनीता लगधज्योतिष भूमिका पृ 26
15. शर्मा पुनीता लगधज्योतिष भूमिका पृ 26
16. विष्णुपुराणे 9/2/14
17. वष्णुपुराणे 1/2/26
18. शास्त्रीनेमीचन्द भारतीय ज्योतिष भूमिका